## कण्ठपृष्ठग्रीवाजङ्घं च। (११४/३८४८)

कण्ठ पृष्ठ ग्रीवा जङ्घा इत्येतानि उत्तरपदानि बहुव्रीहौ समासे सञ्ज्ञौपम्ययो[1]राद्युदात्तानि भवन्ति। [2]कण्ठः सञ्ज्ञायाम् – शितिकण्ठः (तै.सं. ४.५.११.१)। नीलकण्ठः। औपम्ये – खरकण्ठः। उष्ट्रकण्ठः। पृष्ठः [3]सञ्ज्ञायाम् – काण्डपृष्ठः। नाकपृष्ठः। औपम्ये – गोपृष्ठः। अजपृष्ठः। ग्रीवा [4]सञ्ज्ञायाम् – सुग्रीवः। नीलग्रीवः। दशग्रीवः। औपम्ये – गोग्रीवः। अश्वग्रीवः। जङ्घा सञ्ज्ञायाम् – नाडीजङ्घः। तालजङ्घः। औपम्ये – गोजङ्घः। अश्वजङ्घः। एणीजङ्घः॥

## शृङ्गमवस्थायां च। (११५/३८४९)

शृङ्गशब्दः उत्तरपदमवस्थायां सञ्ज्ञौपम्ययोश्च बहुव्रीहौ आद्युदात्तं भवति। उद्गतशृङ्गः। द्व्यङ्गुलशृङ्गः। [5]अत्र शृङ्गोद्गमनादिकृतो गवादेर्वयोविशेषोऽवस्था। सञ्ज्ञायाम् – ऋष्यशृङ्गः। औपम्ये – गोशृङ्गः। मेषशृङ्गः। अवस्थादिषु इति किम्? स्थूलशृङ्गः[6]॥

## नञो जरमरमित्रमृताः। (११६/३८५०)

नञ उत्तरे जरमरमित्रमृता बहुव्रीहौ समासे आद्युदात्ता भवन्ति। अजरः। अमरः। अमित्रः। अमृतः। नञः इति किम्? ब्राह्मणमित्रः[7]। जरादयः इति किम्? अशत्रुः, 'नञ्सुभ्याम्' (६.२.१७२/३९०६) इति उत्तरपदान्तोदात्तत्वमेवात्र[8] भवति॥

## सोर्मनसी अलोमोषसी। (११७/३८५१)

[9]सोः उत्तरं मनन्तम् असन्तं च बहुव्रीहौ समासे आद्युदात्तं भवति लोमोषसी वर्जयित्वा। सुकर्मा। सुधर्मा। सुप्रथिमा। असन्तम् – सुपयाः। सुयशाः। सुस्रोताः। सुस्रत्। [10]सुध्वत्। सोः इति किम्? कृतकर्मा। कृतयशाः। मनसी इति किम्? सुराजा। सुतक्षा। अलोमोषसी इति किम्? सुलोमा। सूषाः। 'अनिनस्मन्ग्रहणान्यर्थवता चानर्थकेन च तदन्तविधिं प्रयोजयन्ति' (व्या.प. १२९) इत्यनर्थकयोरपि मनसो[11]रिह ग्रहणम्। 'नञ्सुभ्याम्' (६.२.१७२/३९०६) इत्यस्य अयमपवादः। कपि [12]तु परत्वात् 'कपि पूर्वम्' (६.२.१७३/३९०७) इत्येतद् भवति। सुकर्मकः। सुस्रोतस्कः॥

## क्रत्वादयश्च। (११८/३८५२)

क्रत्वादयः सोरुत्तरे बहुव्रीहौ समासे आद्युदात्ता भवन्ति। 'सुक्रतुः' (तै.सं. १.२.६.१)। 'सुदृशीकः' (तै.सं. ३.४.११.१)।

क्रतु। दृशीक। प्रतीक। [13]प्रतूर्ति। हव्य। भग। क्रत्वादिः॥

---

1. च इत्यधिकम् फ. 2. कण्ठे फ. 3–4. सञ्ज्ञायाम् नास्ति ह. 5. अत्र नास्ति फ. 6. सञ्ज्ञादिषु इति किम्? मेषशृङ्गः इत्यधिकम् फ. 7. अत्र पूर्वपदप्रकृतिस्वर एव इत्यधिकम् फ. 8. अत्र नास्ति फ. 9. सुशब्दात् परम् ह. 10. सुध्वत् नास्ति फ. 11. इह नास्ति फ.ह. 12. तु नाति ह. 13. प्रपूर्ति मुद्रितः पाठ.